"सावित्री प्रसवित्री च वर्हिर्वाक् मनसी ततः ॥")
माता । प्रपूर्व्वकसूधातोः कर्त्तरि तृच् ङीप् च ॥

प्रसव्यं, त्रि, (प्रगतं सव्यादिति ।) प्रतिकूलम् । इत्यमरः । ३ । १ । ८४ ॥ (प्रदक्षिणम् । यथा, रामायणे । २ । ७३ । २० ।
"प्रसव्यञ्चापि तच्चक्रुर्ऋत्विजोऽग्निचितं नृपम् ॥"
प्र + सू + कर्म्मणि यत् । प्रसवनीये च ॥)

प्रसहः, पुं, (प्रसहतीति । प्र + सह् + अच् ।) बलात्कारेण भक्षकपक्षी । स च कुररश्येनादिः । यथा,—
"प्रसह्य भक्षयन्त्येते प्रसहास्तेन कीर्त्तिताः ॥"
अस्य मांसगुणाः ।
"गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः ।"
इति राजवल्लभः ।
अपि च भावप्रकाशे ।
"काको गृध्र उलूकश्च चिल्लश्च शशघातकः ।
चाषो भासश्च कुरर इत्याद्याः प्रसहाः स्मृताः ॥
शशघातकः वाज इति लोके ।
प्रसहाः कीर्त्तिता एते प्रसह्य छिद्य भक्षणात् ।
प्रसहाः खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये ॥
ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि ॥"

प्रसहनः, पुं, (प्रगतं सहनं सहागुणो यस्मात् ।) हिंस्रपशुः । यथा,—
"शार्दूलसिंहशरभर्क्षतरक्षुमुख्या
येऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते ।
ते कीर्त्तिताः प्रसहनाः पललं तदीय-
मर्शःप्रमेहजठरामयजाड्यहारि ॥"
इति राजनिर्घण्टः ॥
आलिङ्गने, स्त्री । यथा,—
"परस्परप्रसहनचुम्बनादिकाः
शुचौ सुखे बहुलविधा भिदा मताः ॥"
इति काव्यप्रकाशटीकाधृतकाव्यकौमुदी ॥
(प्र + सह् + भावे ल्युट् ।) सहने, स्त्री । तद्वति, त्रि ॥

प्रसहा, स्त्री, (प्र + सह् + अच् । टाप् ।) बृहतिका । इति रत्नमाला ॥ (गुणादयोऽस्या बृहतीशब्दे ज्ञातव्याः ॥)

प्रसह्य, व्य, (प्रकर्षेण सोढ्वा इति । प्र + सह् + क्त्वो ल्यप् ।) हठार्थकम् । बलात्कारार्थम् । इत्यमरः । ३ । ४ । १० ॥ (यथा, माघे ।१।२७।
"प्रसह्य तेजोभिरसंख्यतां गतै-
रदृश्यया शुन्नमनुत्तमं तमः ॥"
प्रसोढुं शक्य इति । प्र + सह् + यत् । प्रकर्षेण सोढुं शक्यं, त्रि । यथा, रघुः । १४ । ६२ ।
"ममैव जन्मान्तरपातकानां
विपाकविस्फूर्ज्जथुरप्रसह्यः ॥")

प्रसह्यचौरः, पुं, (प्रसह्य बलात्कारेण चौरः ।) हठात् चौर्य्यकारी । डाकाइत इति लुटेरा इति च भाषा ॥ तत्पर्य्यायः । बन्दीकारः २ मायलः ३ पिल्लाभः ४ । इति त्रिकाण्डशेषः ॥

प्रसातिका, स्त्री, (सो नाशे + भावे क्तिन् । प्रगता सातिर्नाशो यस्याः । कप् ।) अणुव्रीहिः । स्वल्पधान्यम् । इति रत्नमाला ॥ (यथा, मार्कण्डेये । ३२ । ६ ।
"श्यामाकराजश्यामाकौ तद्वच्चैव प्रसातिकाः ।
नीवाराः पौष्कलाश्चैव धान्यानां पितृतृप्तये ॥")

प्रसादः, पुं, (प्र + सद् + घञ् ।) प्रसन्नता । नैर्म्मल्यम् । इत्यमरः । १ । ३ । १६ ॥ (यथा, प्रबोधचन्द्रोदये प्रस्तावनायाम् ।
"कल्पान्तवातसंक्षोभलङ्घिताशेषभूभृतः ।
स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधेः ॥")
अनुग्रहः । (यथा, रघुः । २ । ६८ ।
"तस्याः प्रसन्नेन्दुमुखः प्रसादं
गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव ॥")
काव्यगुणः । स्वास्थ्यम् । प्रसत्तिः । इति मेदिनी । दे, ३५ ॥ वैदर्भीरीतियुक्तकाव्यगुणः । तस्य लक्षणम् । ग्राम्यशब्दभिन्नव्यक्तार्थपदत्वम् । यथा,—
"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः ।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः ।
व्यक्तार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः ॥"
इति काव्यचन्द्रिका ॥ * ॥
(तथा च साहित्यदर्पणे ८ परिच्छेदे ।
"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।
स प्रसादः समस्तेषु रसेषु रचनासु च ॥")
देवनिवेदितद्रव्यं गुरूणां भुक्तावशेषश्च । यथा,
"आसीदुल्कामुखो राजा प्रजापालनतत्परः ।
प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः ॥"
इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा ॥

प्रसादनं, क्ली, (प्रसादयतीति । प्र + सद् + णिच् + ल्युः ।) अन्नम् । इति त्रिकाण्डशेषः ॥ (प्र + सद् + णिच् + ल्युट् ।) प्रसन्नताकारकम् । यथा, बलवर्णप्रसादनमिति राजवल्लभः ॥ (यथा च महाभारते । ४ । ६६ । २२ ।
"प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये ॥")

प्रसादना, स्त्री, (प्र + सद् + णिच् + युच् + टाप् ।) सेवा । परिचर्य्या । इति हेमचन्द्रः । ३ । १६० ॥

प्रसाधनं, क्ली, (प्रसाध्यतेऽनेनेति । प्र + साध् + ल्युट् ।) वेशः । इत्यमरः । २ । ६ । ६६ ॥ (यथा, मनुः । २ । २११ ।
"अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम् ॥")
कङ्कतिका । इति भरतधृतामरमाला ॥ प्रकर्षनिष्पत्तिश्च ॥ (प्र + साध् + णिच् + ल्युः । प्रसाधयितरि, त्रि । यथा, ऋग्वेदे ।१०।५७।२।
"यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः ॥")

प्रसाधनी, स्त्री, (प्रसाध्यतेऽनयेति । प्र + साध् + ल्युट् । ङीप् ।) सिद्धिः । इति मेदिनी । ने,१६५॥ कङ्कतिका । इत्यमरः । २ । ६ । १३६ ॥ (यथा, सुश्रुते चिकित्सितस्थाने । २४ ।
"केशप्रसाधनी केश्या रजोजन्तुमलापहा ॥")
तद्युक्तिर्यथा,—
"प्रसाधनी दिङ्नवनागसप्त-
सङ्ख्याभिरुक्ताङ्गुलिभिः क्रमेण ।
चतुर्व्विधानां पृथिवीपतीनां
सम्पत्तिसौभाग्ययशःसमृद्धिदा ॥
काष्ठजा धातुजा चैव शृङ्गजा च यथाक्रमम् ।
जाङ्गलानूपसामान्यदेशजानां महीभुजाम् ॥
छत्रदण्डवदुन्नेयः काष्ठजाया विनिश्चयः ।
कनकं रजतं ताम्रं पित्तलं सीसकं तथा ॥
लौहं सर्व्वञ्च सर्व्वार्हमादित्यादिदशासुवाम् ।
राज्ञामेवोपयुज्येत कालकीर्त्तिप्रसाधनी ॥
मृगाणां महिषाणाञ्च सिंहजाता प्रसाधनी ।
गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते ॥
अत्रापि रत्नविन्यासो ज्ञेयश्चामरदण्डवत् ॥"
इति युक्तिकल्पतरुः ॥

प्रसाधिका, स्त्री, (प्रसाधयति निष्पादयतीति । प्र + साध् + ण्वुल् । टापि अत इत्वम् ।) नीवारः । यथा,—
"प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम् ।"
अस्या गुणाः ।
"नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत् ॥"
इति भावप्रकाशः ॥
(प्रसाधयति अलङ्करोतीति । प्र + साध् + णिच् + ण्वुल् ।) वेशकारिणी । यथा,—
"प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचित् द्रवरागमेव ॥"
इति कुमारसम्भवे सप्तमः सर्गः ॥
(धान्यविशेषः यथा । "अणुव्रीहिः प्रसाधिका ।" इति वैद्यकरत्नमालायाम् ॥)

प्रसाधितः, त्रि, (प्र + साधि + क्तः ।) अलङ्कृतः । इत्यमरः । २ । ६ । १०० ॥ प्रकृष्टनिष्पन्नः निष्पादितः । यथा, सारसंग्रहे ।
"ततः प्रस्थमितं कल्कं दत्त्वा तोयचतुर्गुणे ।
क्षीरे प्रसाधितं तैलं ग्रहघ्नं बलवर्णकृत् ॥"

प्रसारः, पुं, (प्र + सृ + घञ् ।) प्रसरणम् । इति हेमचन्द्रः । ३ । ४६६ ॥ (यथा, सुश्रुते ।१।२६।
"प्रसाराकुञ्चनाङ्गानां निःशल्यमिति निर्द्दिशेत् ॥")

प्रसारणं, क्ली, (प्र + सृ + णिच् + ल्युट् ।) पञ्चविधकर्म्मान्तर्गतकर्म्मविशेषः । स तु विस्ताररूपः । यथा, भाषापरिच्छेदे ।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनन्तथा ।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च ॥"
(परिवर्द्धनम् । यथा, कामन्दकीयनीतिसारे । १३ । ३५ ।
"मित्रामित्रहिरण्यानां भूमीनाञ्च प्रसारणम् ॥")

प्रसारणी, स्त्री, (प्रसार्य्यते इति । प्र + सारि + ल्युट् । ङीप् ।) लताविशेषः । गन्धभादालिया इति भाषा ॥ अस्या गुणाः । वातपित्तनाशित्वम् । उष्णत्वम् । बलशुक्रकारित्वञ्च । इति राजवल्लभः ॥ सैन्यानां सर्व्वतो व्याप्तिः । इति प्रसरणशब्दटीकायां भरतः ॥

प्रसारिणी, स्त्री, (प्रसरतीति । प्र + सृ + णिनिः ङीप् ।) कुब्जालुलता । प्रसारणी । गन्धभादा-